श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः
श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

# श्रीमद्वाल्मीकीयरामायणम्

## ॥ सुन्दरकाण्डम् ॥

### पञ्चत्रिंशः सर्गः

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the Wikner font.

श्रीः
श्रीसीतारामाभ्यां नमः
श्रीमते रामानुजाय नमः

# ॥ सुन्दरकाण्डम् ॥

## पञ्चत्रिंशः सर्गः

*सीतया पृष्टेन हनुमता श्रीरामस्य शारीरिकलक्षणानां गुणानां च वर्णनं नरवानरमैत्रीप्रसङ्गं श्रावयित्वा सीताया मनसि स्वकीयविश्वासस्योत्पादनं च*

तां तु रामकथां श्रुत्वा वैदेही वानरर्षभात्।
उवाच वचनं सान्त्वमिदं मधुरया गिरा॥ ५.३५.१ ॥

क्व ते रामेण संसर्गः कथं जानासि लक्ष्मणम्।
वानराणां नराणां च कथमासीत् समागमः॥ ५.३५.२ ॥

यानि रामस्य चिह्नानि लक्ष्मणस्य च वानर।
तानि भूयः समाचक्ष्व न मां शोकः समाविशेत्॥ ५.३५.३ ॥

कीदृशं तस्य संस्थानं रूपं तस्य च कीदृशम्।
कथमूरू कथं बाहू लक्ष्मणस्य च शंस मे॥ ५.३५.४ ॥

एवमुक्तस्तु वैदेह्या हनूमान् मारुतात्मजः।
ततो रामं यथातत्त्वमाख्यातुमुपचक्रमे॥ ५.३५.५ ॥

जानन्ती बत दिष्ट्या मां वैदेहि परिपृच्छसि।
भर्तुः कमलपत्राक्षि संस्थानं लक्ष्मणस्य च॥ ५.३५.६ ॥

यानि रामस्य चिह्नानि लक्ष्मणस्य च यानि वै।
लक्षितानि विशालाक्षि वदतः शृणु तानि मे॥ ५.३५.७ ॥

रामः कमलपत्राक्षः पूर्णचन्द्रनिभाननः।
रूपदाक्षिण्यसम्पन्नः प्रसूतो जनकात्मजे॥ ५.३५.८ ॥

www.prapatti.com

तेजसाऽऽदित्यसङ्काशः क्षमया पृथिवीसमः।
बृहस्पतिसमो बुद्ध्या यशसा वासवोपमः॥ ५.३५.९ ॥

रक्षिता जीवलोकस्य स्वजनस्य च रक्षिता।
रक्षिता स्वस्य वृत्तस्य धर्मस्य च परन्तपः॥ ५.३५.१० ॥

रामो भामिनि लोकस्य चातुर्वर्ण्यस्य रक्षिता।
मर्यादानां च लोकस्य कर्ता कारयिता च सः॥ ५.३५.११ ॥

अर्चिष्मानर्चितोऽत्यर्थं ब्रह्मचर्यव्रते स्थितः।
साधूनामुपकारज्ञः प्रचारज्ञश्च कर्मणाम्॥ ५.३५.१२ ॥

राजनीत्यां विनीतश्च ब्राह्मणानामुपासकः।
ज्ञानवान् शीलसम्पन्नो विनीतश्च परन्तपः॥ ५.३५.१३ ॥

यजुर्वेदविनीतश्च वेदविद्भिः सुपूजितः।
धनुर्वेदे च वेदे च वेदाङ्गेषु च निष्ठितः॥ ५.३५.१४ ॥

विपुलांसो महाबाहुः कम्बुग्रीवः शुभाननः।
गूढजत्रुः सुताम्राक्षो रामो नाम जनैः श्रुतः॥ ५.३५.१५ ॥

दुन्दुभिस्वननिर्घोषः स्निग्धवर्णः प्रतापवान्।
समश्च सुविभक्ताङ्गो वर्णं श्यामं समाश्रितः॥ ५.३५.१६ ॥

त्रिस्थिरस्त्रिप्रलम्बश्च त्रिसमस्त्रिषु चोन्नतः।
त्रिताम्रस्त्रिषु च स्निग्धो गम्भीरस्त्रिषु नित्यशः॥ ५.३५.१७ ॥

त्रिवलीमांस्त्र्यवनतश्चतुर्व्यङ्गस्त्रिशीर्षवान्।
चतुष्कलश्चतुर्लेखश्चतुष्किष्कुश्चतुः समः॥ ५.३५.१८ ॥

चतुर्दशसमद्वन्द्वश्चतुर्दंष्ट्रश्चतुर्गतिः।
महोष्ठहनुनासश्च पञ्चस्निग्धोऽष्टवंशवान्॥ ५.३५.१९ ॥

दशपद्मो दशबृहत् त्रिभिर्व्याप्तो द्विशुक्लवान्।
षडुन्नतो नवतनुस्त्रिभिर्व्याप्नोति राघवः॥ ५.३५.२० ॥

सत्यधर्मरतः श्रीमान् सङ्ग्रहानुग्रहे रतः।
देशकालविभागज्ञः सर्वलोकप्रियंवदः॥ ५.३५.२१ ॥

भ्राता चास्य च वैमात्रः सौमित्रिरमितप्रभः।
अनुरागेण रूपेण गुणैश्चापि तथाविधः॥ ५.३५.२२ ॥

स सुवर्णच्छविः श्रीमान् रामः श्यामो महायशाः।
तावुभौ नरशार्दूलौ त्वद्दर्शनकृतोत्सवौ॥ ५.३५.२३ ॥

विचिन्वन्तौ महीं कृत्स्नामस्माभिः सह सङ्गतौ।
त्वामेव मार्गमाणौ तौ विचरन्तौ वसुन्धराम्॥ ५.३५.२४ ॥

ददर्शतुर्मृगपतिं पूर्वजेनावरोपितम्।
ऋष्यमूकस्य मूले तु बहुपादपसङ्कुले॥ ५.३५.२५ ॥

भ्रातुर्भयार्तमासीनं सुग्रीवं प्रियदर्शनम्।
वयं च हरिराजं तं सुग्रीवं सत्यसङ्गरम्॥ ५.३५.२६ ॥

परिचर्यामहे राज्यात् पूर्वजेनावरोपितम्।
ततस्तौ चीरवसनौ धनुःप्रवरपाणिनौ॥ ५.३५.२७ ॥

ऋष्यमूकस्य शैलस्य रम्यं देशमुपागतौ।
स तौ दृष्ट्वा नरव्याघ्रौ धन्विनौ वानरर्षभः॥ ५.३५.२८ ॥

अभिप्लुतो गिरेस्तस्य शिखरं भयमोहितः।
ततः स शिखरे तस्मिन् वानरेन्द्रो व्यवस्थितः॥ ५.३५.२९ ॥

तयोः समीपं मामेव प्रेषयामास सत्वरम्।
तावहं पुरुषव्याघ्रौ सुग्रीववचनात् प्रभू॥ ५.३५.३० ॥

रूपलक्षणसम्पन्नौ कृताञ्जलिरुपस्थितः।
तौ परिज्ञाततत्त्वार्थौ मया प्रीतिसमन्वितौ॥ ५.३५.३१ ॥

पृष्ठमारोप्य तं देशं प्रापितौ पुरुषर्षभौ।
निवेदितौ च तत्त्वेन सुग्रीवाय महात्मने॥ ५.३५.३२ ॥


www.prapatti.com

तयोरन्योन्यसम्भाषाद् भृशं प्रीतिरजायत।
तत्र तौ कीर्तिसम्पन्नौ हरीश्वरनरेश्वरौ॥ ५.३५.३३ ॥

परस्परकृताश्वासौ कथया पूर्ववृत्तया।
तं ततः सान्त्वयामास सुग्रीवं लक्ष्मणाग्रजः॥ ५.३५.३४ ॥

स्त्रीहेतोर्वालिना भ्रात्रा निरस्तं पुरुतेजसा।
ततस्त्वन्नाशजं शोकं रामस्याक्लिष्टकर्मणः॥ ५.३५.३५ ॥

लक्ष्मणो वानरेन्द्राय सुग्रीवाय न्यवेदयत्।
स श्रुत्वा वानरेन्द्रस्तु लक्ष्मणेनेरितं वचः॥ ५.३५.३६ ॥

तदासीन्निष्प्रभोऽत्यर्थं ग्रहग्रस्त इवांशुमान्।
ततस्त्वद्गात्रशोभीनि रक्षसा ह्रियमाणया॥ ५.३५.३७ ॥

यान्याभरणजालानि पातितानि महीतले।
तानि सर्वाणि रामाय आनीय हरियूथपाः॥ ५.३५.३८ ॥

संहृष्टा दर्शयामासुर्गतिं तु न विदुस्तव।
तानि रामाय दत्तानि मयैवोपहृतानि च॥ ५.३५.३९ ॥

स्वनवन्त्यवकीर्णानि तस्मिन् विहतचेतसि।
तान्यङ्के दर्शनीयानि कृत्वा बहुविधं तदा॥ ५.३५.४० ॥

तेन देवप्रकाशेन देवेन परिदेवितम्।
पश्यतस्तानि रुदतस्ताम्यतश्च पुनः पुनः॥ ५.३५.४१ ॥

प्रादीपयद् दाशरथेस्तदा शोकहुताशनम्॥ ५.३५.४२ ॥

शयितं च चिरं तेन दुःखार्तेन महात्मना।
मयापि विविधैर्वाक्यैः कृच्छ्रादुत्थापितः पुनः॥ ५.३५.४३ ॥

तानि दृष्ट्वा महार्हाणि दर्शयित्वा मुहुर्मुहुः।
राघवः सहसौमित्रिः सुग्रीवे संन्यवेशयत्॥ ५.३५.४४ ॥

स तवादर्शनादार्ये राघवः परितप्यते।
महता ज्वलता नित्यमग्निनेवाग्निपर्वतः॥ ५.३५.४५ ॥

त्वत्कृते तमनिद्रा च शोकश्चिन्ता च राघवम्।
तापयन्ति महात्मानमग्न्यगारमिवाग्नयः॥ ५.३५.४६ ॥

तवादर्शनशोकेन राघवः परिचाल्यते।
महता भूमिकम्पने महानिव शिलोच्चयः॥ ५.३५.४७ ॥

काननानि सुरम्याणि नदीप्रस्रवणानि च।
चरन् न रतिमाप्नोति त्वामपश्यन् नृपात्मजे॥ ५.३५.४८ ॥

स त्वां मनुजशार्दूलः क्षिप्रं प्राप्स्यति राघवः।
समित्रबान्धवं हत्वा रावणं जनकात्मजे॥ ५.३५.४९ ॥

सहितौ रामसुग्रीवावुभावकुरुतां तदा।
समयं वालिनं हन्तुं तव चान्वेषणं प्रति॥ ५.३५.५० ॥

ततस्ताभ्यां कुमाराभ्यां वीराभ्यां स हरीश्वरः।
किष्किन्धां समुपागम्य वाली युद्धे निपातितः॥ ५.३५.५१ ॥

ततो निहत्य तरसा रामो वालिनमाहवे।
सर्वर्क्षहरिसङ्घानां सुग्रीवमकरोत् पतिम्॥ ५.३५.५२ ॥

रामसुग्रीवयोरैक्यं देव्येवं समजायत।
हनूमन्तं च मां विद्धि तयोर्दूतमुपागतम्॥ ५.३५.५३ ॥

स्वं राज्यं प्राप्य सुग्रीवः स्वानानीय महाकपीन्।
त्वदर्थं प्रेषयामास दिशो दश महाबलान्॥ ५.३५.५४ ॥

आदिष्टा वानरेन्द्रेण सुग्रीवेण महौजसः।
अद्रिराजप्रतीकाशाः सर्वतः प्रस्थिता महीम्॥ ५.३५.५५ ॥

ततस्ते मार्गमाणा वै सुग्रीववचनातुराः।
चरन्ति वसुधां कृत्स्नां वयमन्ये च वानराः॥ ५.३५.५६ ॥

अङ्गदो नाम लक्ष्मीवान् वालिसूनुर्महाबलः।
प्रस्थितः कपिशार्दूलस्त्रिभागबलसंवृतः॥ ५.३५.५७ ॥

तेषां नो विप्रणष्टानां विन्ध्ये पर्वतसत्तमे।
भृशं शोकपरीतानामहोरात्रगणा गताः॥ ५.३५.५८ ॥

ते वयं कार्यनैराश्यात् कालस्यातिक्रमेण च।
भयाच्च कपिराजस्य प्राणांस्त्यक्तुमुपस्थिताः॥ ५.३५.५९ ॥

विचित्य गिरिदुर्गाणि नदिप्रस्रवणानि च।
अनासाद्य पदं देव्याः प्राणांस्त्यक्तुं व्यवस्थिताः॥ ५.३५.६० ॥

ततस्तस्य गिरेर्मूर्ध्नि वयं प्रायमुपास्महे।
दृष्ट्वा प्रायोपविष्टांश्च सर्वान् वानरपुङ्गवान्॥ ५.३५.६१ ॥

भृशं शोकार्णवे मग्नः पर्यदेवयदङ्गदः।
तव नाशं च वैदेहि वालिनश्च तथा वधम्॥ ५.३५.६२ ॥

प्रायोपवेशमस्माकं मरणं च जटायुषः।
तेषां नः स्वामिसन्देशान्निराशानां मुमूर्षताम्॥ ५.३५.६३ ॥

कार्यहेतोरिहायातः शकुनिर्वीर्यवान् महान्।
गृध्रराजस्य सोदर्यः सम्पातिर्नाम गृध्रराट्॥ ५.३५.६४ ॥

श्रुत्वा भ्रातृवधं कोपादिदं वचनमब्रवीत्।
यवीयान् केन मे भ्राता हतः क्व च निपातितः॥ ५.३५.६५ ॥

एतदाख्यातुमिच्छामि भवद्भिर्वानरोत्तमाः।
अङ्गदोऽकथयत् तस्य जनस्थाने महद्वधम्॥ ५.३५.६६ ॥

रक्षसा भीमरूपेण त्वामुद्दिश्य यथार्थतः।
जटायोस्तु वधं श्रुत्वा दुःखितः सोऽरुणात्मजः॥ ५.३५.६७ ॥

त्वामाह स वरारोहे वसन्तीं रावणालये।
तस्य तद् वचनं श्रुत्वा सम्पातेः प्रीतिवर्धनम्॥ ५.३५.६८ ॥

अङ्गदप्रमुखाः सर्वे ततः प्रस्थापिता वयम्।
विन्ध्यादुत्थाय सम्प्राप्ताः सागरस्यान्तमुत्तमम्॥ ५.३५.६९ ॥

त्वद्दर्शने कृतोत्साहा हृष्टाः पुष्टाः प्लवङ्गमाः।
अङ्गदप्रमुखाः सर्वे वेलोपान्तमुपगताः॥ ५.३५.७० ॥

चिन्तां जग्मुः पुनर्भीमां त्वद्दर्शनसमुत्सुकाः।
अथाहं हरिसैन्यस्य सागरं दृश्य सीदतः॥ ५.३५.७१ ॥

व्यवधूय भयं तीव्रं योजनानां शतं प्लुतः।
लङ्का चापि मया रात्रौ प्रविष्टा राक्षसाकुला॥ ५.३५.७२ ॥

रावणश्च मया दृष्टस्त्वं च शोकनिपीडिता।
एतत् ते सर्वमाख्यातं यथावृत्तमनिन्दिते॥ ५.३५.७३ ॥

अभिभाषस्व मां देवि दूतो दाशरथेरहम्।
तन्मां रामकृतोद्योगं त्वन्निमित्तमिहागतम्॥ ५.३५.७४ ॥

सुग्रीवसचिवं देवि बुध्यस्व पवनात्मजम्।
कुशली तव काकुत्स्थः सर्वशस्त्रभृतां वरः॥ ५.३५.७५ ॥

गुरोराराधने युक्तो लक्ष्मणः शुभलक्षणः।
तस्य वीर्यवतो देवि भर्तुस्तव हिते रतः॥ ५.३५.७६ ॥

अहमेकस्तु सम्प्राप्तः सुग्रीववचनादिह।
मयेयमसहायेन चरता कामरूपिणा॥ ५.३५.७७ ॥

दक्षिणा दिगनुक्रान्ता त्वन्मार्गविचयैषिणा।
दिष्ट्याहं हरिसैन्यानां त्वन्नाशमनुशोचताम्॥ ५.३५.७८ ॥

अपनेष्यामि सन्तापं तवाधिगमशासनात्।
दिष्ट्या हि न मम व्यर्थं सागरस्येह लङ्घनम्॥ ५.३५.७९ ॥

प्राप्स्याम्यहमिदं देवि त्वद्दर्शनकृतं यशः।
राघवश्च महावीर्यः क्षिप्रं त्वामभिपत्स्यते॥ ५.३५.८० ॥

सपुत्रबान्धवं हत्वा रावणं राक्षसाधिपम्।
माल्यवान् नाम वैदेहि गिरीणामुत्तमो गिरिः॥ ५.३५.८१ ॥

ततो गच्छति गोकर्णं पर्वतं केसरी हरिः।
स च देवर्षिभिर्दिष्टः पिता मम महाकपिः।
तीर्थे नदीपतेः पुण्ये शम्बसादनमुद्धरन्॥ ५.३५.८२ ॥

यस्याहं हरिणः क्षेत्रे जातो वातेन मैथिलि।
हनुमानिति विख्यातो लोके स्वेनैव कर्मणा॥ ५.३५.८३ ॥

विश्वासार्थं तु वैदेहि भर्तुरुक्ता मया गुणाः।
अचिरात् त्वामितो देवि राघवो नयिता ध्रुवम्॥ ५.३५.८४ ॥

एवं विश्वासिता सीता हेतुभिः शोककर्शिता।
उपपन्नैरभिज्ञानैर्दूतं तमधिगच्छति॥ ५.३५.८५ ॥

अतुलं च गता हर्षं प्रहर्षेण च जानकी।
नेत्राभ्यां वक्रपक्ष्माभ्यां मुमोचानन्दजं जलम्॥ ५.३५.८६ ॥

चारु तद् वदनं तस्यास्ताम्रशुक्लायतेक्षणम्।
अशोभत विशालाक्ष्या राहुमुक्त इवोडुराट्॥ ५.३५.८७ ॥

हनूमन्तं कपिं व्यक्तं मन्यते नान्यथेति सा।
अथोवाच हनूमांस्तामुत्तरं प्रियदर्शनाम्॥ ५.३५.८८ ॥

एतत्ते सर्वमाख्यातं समाश्वसिहि मैथिलि।
किं करोमि कथं वा ते रोचते प्रतियाम्यहम्॥ ५.३५.८९ ॥

हतेऽसुरे संयति शम्बसादने
    कपिप्रवीरेण महर्षिचोदनात्।
ततोऽस्मि वायुप्रभवो हि मैथिलि
    प्रभावतस्तत्प्रतिमश्च वानरः॥ ५.३५.९० ॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे पञ्चत्रिंशः सर्गः॥